# चशब्दयुक्तवाक्यविश्लेषणम्

सञ्जीवः पाञ्चालः
अम्बा कुलकर्णी
हैद्राबाद् केन्द्रीयविश्वविद्यालयः, हैद्राबाद्
snjvpnchl@gmail.com, ambapradeep@gmail.com

## 1 प्रस्तावना

वाक्यविश्लेषणं नाम वाक्यस्थपदानां परस्परसम्बन्धपुरस्सरं वाक्यावगतिः। पुनः परस्परसम्बन्धितपदेषु किञ्चनपदं विशेष्यं भवति किञ्चनपदं विशेषणं भवति। यथा वाक्ये तिङन्तं पदं प्रधानं विशेष्यं भवति तदितरत् अप्रधानं विशेषणम्। विशेषणं सर्वदा विशेष्यपरकं भवति। विशेष्यं तिङन्तं तु तस्य विशेषणस्य आश्रयः भवति। अत एव विशेषणपदम् `आश्रयी' इत्युच्यते। एवं च कृत्वा विशेष्यविशेषणयोः पदयोः आश्रयाश्रयीभावः परिकल्प्यते। अयमेव आश्रयाश्रयीभावः पाश्चात्यभाषाविदुषां मते **dependency** इति नाम्ना अभिधीयते। 1990 इत्यारभ्य NLP इत्येतत् dependency विश्लेषणं प्रत्युत्क्रमते। कतिपयेभ्यः वर्षेभ्यः dependency बहुप्रमुखताम् अभजत। सङ्गणकीयभाषातन्त्रज्ञाः (computational linguists) यान्त्रिकानुवादे, सूचनासङ्ग्रहे, सूचनापरिग्रहे, प्रश्नोत्तरे (question-answering), भाषाविश्लेषणे च एतस्य बहुप्राधान्यम् अमन्यन्त। अत एव तैः अनेकभाषाणां विश्लेषणार्थं बहुविधानि वाक्यविश्लेषकयन्त्राणि (dependency parsers) निर्मितानि। यत्र च dependency framework बहूपकाराय अमन्यत। भाषाविदः सङ्गणकीयभाषातन्त्रज्ञाः च अस्मिन् क्षेत्रे बहुयोगदानं दत्तवन्तः। येन कारणेन अधुना बहुविधाः भाषाविश्लेषणोपयोगी-कारकाङ्कननिर्देशाः (Guidelines for annotation of dependency) उपलभ्यन्ते। एतेषु उपलब्धकारकाङ्कननिर्देशेषु समुच्चयः (co-ordinate structures) इति अंशः तु सङ्गणकीयभाषाविज्ञानदृष्ट्या शास्त्रीयदृष्ट्या च महत्वपूर्णं स्थानम् आवहति। अस्य च समुच्चयस्य विश्लेषणम्,समुच्चितपदानां परस्परसम्बन्धकल्पनम्, अन्वयः, चित्रात्मकप्रस्तुतिः (Graphical representation) इति विषये भाषाविदुषां परस्परं मतभेदाः सन्ति। एवमेव सङ्गणकीयभाषाविदुषामपि। भारतीयवैयाकरणेषु अपि समुच्चयः, तदर्थद्योतकः चशब्दः, तस्यार्थः, तदन्वयः इति विषये च बहुचर्चा समुपलभ्यते। यच्च चशब्दप्रयुक्तवाक्यविश्लेषणक्रमे उपकाराय कल्पते। इदानीं वयमत्र एतेषां मतानां स-

मीक्षणं कृत्वा संस्कृते चशब्दयुक्तवाक्यानां विश्लेषणं तेषां dependency representation कथं वा भवेत् इति युक्ततरं मतं प्रस्तुमः।

वयम् इतः अग्रिमे खण्डे सङ्गणकीयभाषाविदुषाम् अनेकविधानां dependency सिद्धान्तानां तथा तेषां चित्रात्मकप्रस्तुतीनां सङ्क्षेपेण सारं प्रस्तुमः। तत्र च एतानि विश्लेषणानि प्रायः [Mazziotta (2014)] तथा [Nivre (2005)] एतेषां मतेन उत्प्रेरितानि सन्ति। तृतीये खण्डे अधिव्याकरणशास्त्रं चार्थविश्लेषणं पश्यामः। चतुर्थे च खण्डे चशब्दयुक्तवाक्यानां dependency विश्लेषणं कथं वा भवेत् इति स्वकीयं मतम् उपपादयामः।

# 2 पाश्चात्यभाषाविदुषां समुच्चयनिरूपणम्

समुच्चयविश्लेषणे अंशद्वयं वर्तते। प्रथमः चशब्दः वाचकः उत द्योतकः वा। द्वितीयश्च चशब्दस्य dependency-सम्बन्धाः इति। तत्र तावत् वाचकत्वद्योतकत्वविषये [Jahannessen (1998), पृष्ट 105] इत्यनुसारेण ज्ञायते यत् प्रायशः भाषाविद्वांसः चशब्दं द्योतकमेव मन्यन्ते इति। द्वितीयांशे च अधस्तनानि प्रश्नानि उद्यन्ति।

1. किं समुच्चयद्योतकं `च' इति पदं प्रधानम्?
2. यदि प्रधानं तर्हि एतस्य आश्रितपदानि कानि? तथा च एतदपि कुत्रचित् आश्रयं याति वा?
3. चशब्दं प्रति समुचितानां सर्वेषामपि पदानां सम्बन्धः समानः भवति उत न?

एतानि च प्रश्नानि पुरस्कृत्य वयम् इदानीं पाश्चात्यभाषाविदुषां विभिन्नमतानां सारं सङ्क्षेपेण प्रस्तुमः।

## 2.1 Tesnière's baseline

Lucien Tesnière इति आधुनिकभाषावित् यः dependency grammar इति विषये कार्यमकरोत् सः "junction" [Osbone and Kahane (2015)] इति अवधारणानुसारं स्वकीयं मतं प्रस्तौति। यत्र समुच्चीयमानपदानि परस्परं समानस्तरे horizontal-सम्बन्धेन संयुञ्जन्ति। तदाश्रिते तु पदे इत्युक्ते प्रधानपदे (क्रियायां) vertical-सम्बन्धेन सम्बध्नन्ति। एतेषां सम्बन्धानां चित्रात्मकप्रस्तुतिः इत्थं भवति।

**Alfred and Bernard fall** **(1)**




चित्रम् 1 : Tesnière

यथा चित्रम् [1] इत्यत्र वयं पश्यामः यत् `Alfred' पुनः `Bernard' इति द्वे पदे 'fall' इति प्रधानक्रियायाम् आश्रिते स्तः। अतः 'fall' इति क्रियापदम् अत्र आश्रयः (governer) इति ज्ञायते। `Alfred' पुनः `Bernard' पदे तु आश्रिते (governed) इति। अनयोः पदयोः पुनः परस्परं तादृशः आश्रयाश्रयीभावसम्बन्धः (dependency) न भवति यथा प्रधानक्रियां प्रति भवति। `and' इति पदं तु तौ पदौ योजयति। अत्र ध्यातव्यः अंशः अयमस्ति यत् `and' इति पदं कुत्रापि (अन्वयम्) आश्रयं न प्राप्नोति। अतः Graphical representation सर्वदा त्रिभुजाकारे भवति। अस्मिन् विश्लेषणे सर्वदा क्रियायां सङ्घान्वयापत्तिः वर्तते यतो हि क्रियापदमत्र द्विवचनान्तमुत बहुवचनान्तं भवति। परं तदभीधीयमानपदं तु एकवचनान्तम् अथवा द्विवचनान्तं भवति।

## 2.2 Timothy Osborne

2008 वर्षे Timothy Osborne इति भाषावित् स्वकीयं मतं प्रस्तुतवान् तच्च Tesnière मतेन किञ्चित् असाम्यं भजते। [Osborne (2008)] तु समुच्चीयमानपदद्वयस्यापि प्रधानक्रियायाम् अन्वयं न मनुते। समुच्चीयमानपदयोः प्रथमं पदमेव क्रियायाम् अन्वेति इति मनुते। अन्यत् सर्वं Tesnière मतेन साम्यं भवति। यथा चित्रम् [2] अस्मिन्नपि विश्लेषणे




चित्रम् 2 : Timothy Osborne

सङ्घान्वयापत्त्या सह समुच्चीयमानद्वितीयपदस्य क्रियया सह सम्बन्धाभावः लक्ष्यते।

## 2.3 Mel'čuk

[Mel'čuk (1988)] इति विद्वान् स्वकीये Meaning Text Theory (MTT) इति सिद्धान्ते प्रधानपदस्य संज्ञानार्थं syntax, morphology तथा semantic इति अंशान् निकषत्वेन प्रयुङ्क्ते। यस्य आधारेण तावत् पदानां विशेष्यविशेषणभावः (Governor-Governee relation) निश्चिनोति। समुच्चयस्य dependency-विश्लेषणे तु सः syntax तथा semantics इत्येतस्य उपयोगं करोति। सः प्रतिपादयति यत् समुच्चयविषये तावत् आर्थिकस्तरे (semantic level) समुच्चीयमानपदेषु समानता भवति। परन्तु वाक्यस्तरे (syntactic level) तु समुच्चीयमानपदयोः प्रथमं पदमेव प्रधानं भवति। द्वितीयं पदं पुनः प्रथमपदम् आश्रयति।




चित्रम् 3: Mel'čuk

चित्रेऽस्मिन् [3] समुच्चीयमाने पदे न तथा स्वतन्त्रे स्तः यथा Tesnière or Osborne इति मते स्तः। अत्र द्वितीयं पदं प्रथमपदं पूर्वम् आश्रयति ततः क्रियापदम् आश्रयति इति परम्परया तस्य क्रियायम् अन्वयः भवति। Tesnière मते तु पदद्वयमपि साक्षात् क्रियाम् आश्रयति। एतादृशविश्लेषणे

**Old men and women** **(2)**

इति वाक्यम्

क) (old men) and (old women),

ख) (old men) and women

इति द्विधा विश्लेषयितुं न शक्यते। यतो हि अस्मिन् dependency-विश्लेषणे केवलं एकविधं विश्लेषणमेव कर्तुं शक्यते। यथा चित्रं [4] पश्यत-




चित्रम् 4 : Mel'čuk

अत्र `old' इति पदम् men तथा women इत्युभयस्यापि विशेषणं भवति वा इति न ज्ञातुं शक्यते। एवमेव यत्र वाक्ये क्रियापदस्य समुच्चितपदद्वयेन सम्बन्धः भवति, पुनश्च यत्र कर्तृपदस्यापि समुच्चितपदद्वयेन सम्बन्धः भवति, तत्र अनेन क्रमेण समुच्चयविश्लेषणं कर्तुं युक्ततरं न प्रतीयते। यथा-

**John loves Mary and Peter** **(3)**

**John gets a letter from Mary and roses from Ann** **(4)**

## 2.4 Hudson's Word Grammar

[Hudson (1988)] इति विद्वान् मन्यते यत् dependency structure मध्ये पदानां स्तरः समानः न भवति परन्तु समुच्चये तु समुच्चितानां पदानां स्तरः समानः भवति इति। समुच्चितानां पदानां dependency सम्बन्धान् तु Tesnière विदुषः इव अङ्कयति। परं समुच्चितपदानि समुच्चयद्योतके `and' इति पदे आश्रितानि भवन्ति इति अङ्कयति। यथा-

**He saw Arthur and Bill** **(5)**

इति वाक्यम् एवं विश्लिष्यते अस्मिन् [5] चित्रे-




चित्रम् 5 : Hudson's Word Grammar

## 2.5 Rosta

[Rosta (2006)] इति भाषावित् स्पष्टयति यत् समुचिते पदे dependency-सम्बन्धेन प्रधानक्रियाम् आश्रयतः एव, परं ततः पूर्वमेव ते पदे समुच्चयद्योतकेन `and' इति पदेन अवयवावयवीभावसबन्धेन (part-whole relation) संयुक्ते भवतः। इदानीम् `and' इति पदं समुचितपदसमूहस्य प्रतिनिधिः (proxy) इव भवति। तस्य च पुनः क्रियायाम् अन्वयः भवति। एतदाधारेण वाक्यस्य विश्लेषणम् एवं भवति यथा चित्रम् [6]-




चित्रम् 6 : Rosta's representation of (5)

एवमेव पुनः

**She will give Sophy roses and Edagar tulips** **(6)**

इति वाक्यम् इत्थं विश्लिष्यते [7]-




चित्रम् 7 : Rosta's representation of (6)

Hudson पुनः Rosta इति उभययोः चित्रात्मकप्रस्तुतौ भेदरूपेण ध्यातव्यः अंशः अयमस्ति यत् समुच्चये समुच्चितपदसमुदायस्य एकः प्रतिनिधिः भवति, तद्धारा परम्परया सम्बन्धेन समुच्चितपदे प्रधानक्रियां प्रति अन्वयं लभतः इति Rosta प्रतिपायति। तत्रैव पुनः Hudson प्रतिनिधिरूपेण यत्किमपि पदं न स्वीकरोति परन्तु तत्स्थाने एकं रिक्तं वृत्तं कल्पयति येन माध्यमेन समुच्चितपदे प्रधानक्रियां प्रति अन्वयं लभताम् इति।

## 2.6 सङ्गणकीयभाषाविदुषां समुच्चयनिरूपणम्

पाश्चात्यभाषाविदुषां समुच्चयनिरूपणं समीक्ष्य इदानीं सङ्गणकीयभाषाविद्वांसः कथं वा समुच्चयं विश्लेषयन्तीति अधस्तात् पश्यामः।[Popel et al. (2013)] इदमत्र अवधेयम् यत् dependency tree banks मध्ये समुच्चयनिरूपणं बहुधा भिन्नं भिन्नं वर्तते। प्रत्येकस्याः अपि भिन्नतायाः ते समुचितं समाधानं ददति। वयमत्र उदाहरणार्थं एकं English-तः अपरं Hindi tree bank-तः उदाहरणं प्रस्तुमः।

Standford dependency parser इत्यत्र, समुच्चयनिरूपणं dependency structure मध्ये एव निरूप्यते। यत्र च प्रथमसमुच्चितपदम् एव प्रधानं भवति। अतः वाक्यस्य (3) विश्लेषणम् एवं प्रस्तूयते। पश्यत चित्रम् [8]-




चित्रम् 8: Stanford Dependency

अस्मिन् विश्लेषणे Mel'čuk मतानुसारमेव प्रथमं समुचितपदं प्रधानं भवति, तत्र च समुच्चयद्योतकं `and' इति पदम् आश्रयं लभते। परन्तु द्वितीयसमुचितपदाश्रयविश्लेषणे भिन्नता दृश्यते। द्वितीयसमुचितपदं तु प्रथमसमुचितपदम् आश्रयति न तु `and' इति पदम् आश्रयति। Prague dependency tree bank इत्यत्र समुचितपदद्वयस्यापि समुच्चयद्योतके `and' इति पदे आश्रयं कल्प्यते। एतद् विश्लेषणं पुनः Rosta मतेन साम्यं भजते यच्च चित्रम् [6] इत्यत्र द्रष्टुं शक्यते।

हिन्दीभाषाविश्लेषणे Hyderabad Dependency Treebank इत्यत्रापि `and' इति पदं प्रधानं भवति यत्र च पुनः समुचिते पदे `ccof' इति सम्बन्धेन आश्रयं लभते।

**Hnd: राम और श्याम स्कूल जाते हैं।** **(7)**

**Eng:** Rama and Syama go to school.

इति वाक्यम् एवं विश्लिष्यते। पश्यत चित्रं [9]-




चित्रम् 9: Hindi Treebank

एवं प्रकारेण विविधविदुषां समुच्चययुक्तवाक्यानां विश्लेषणे सम्बन्धनिरूपणे च समानता नास्तीति ज्ञायते। साररूपेण एवं वक्तुं शक्यते यत् समुचितपदेषु (conjuncts) तथा

समुच्चयद्योतकेषु पदेषु (conjunction) यः सम्बन्धः भवति सः समानुवर्ती (symmetric) अथवा असमानुवर्ती (asymmetric) इति उभयम् अपि भवितुमर्हति। Tesnère, Hudson, Rosta, Prague Tree bank पुनः Hindi Tree bank इत्येते जनाः तं सम्बन्धं समानुवर्ती (symmetric) इति मन्यन्ते। तत्रैव पुनः dependency-सम्बन्धेषु काचन मतभिन्नता तु दृश्यते। Tesnière इति विद्वांसं विहाय ये च सम्बन्धम् असमानुवर्ती (symmetric) इति मन्यन्ते ते सर्वेऽपि समुच्चितपदानि समुच्चयद्योतके आश्रितानि इत्यङ्कयन्ति। समुच्चयद्योतकपदस्य (`**and**') आश्रयविषये पुनः ते भिन्नं भिन्नं मतं प्रस्तुवन्ति।

Tesnière तथा Hudson इति विद्वांसौ तु समुच्चयद्योतकपदस्य आश्रयः नैव भवतीति मन्येते। तत्रैव पुनः Rosta, Hindi Treebank तथा Prague Treebank जनाः तु समुच्चयद्योतकपदस्य आश्रयः प्रधानं क्रियापदं भवतीति मन्यन्ते। ये च पुनः सम्बन्धम् असमानुवर्ती (asymmetric) इति मन्यन्ते ते तु समुच्चयद्योतकं `and' इति पदं स्वतन्त्रं मन्यन्ते। अथवा समुच्चितप्रथमं पदम् आश्रयति पुनः तदनन्तरपदानाम् आश्रयः भवतीति। अधस्तनतालिका सङ्क्षेपरूपेण एतानि विविधमतानि प्रस्तौति।

| | **Governee (आश्रितः)** | **Governed by (आश्रयः)** | **Symmetric (समानुवर्ती)** |
|---|---|---|---|
| Tesnière | - | - | आम् |
| Hudson | समुच्चित-पदद्वयम् | - | आम् |
| Rosta<br><br>Prague Dependencency Hindi Tree Bank | समुच्चित-पदद्वयम् | क्रिया | आम् |
| Osborne | - | - | न |
| Mel'čuk | समुच्चितानन्तर-पदम् | प्रथमसमुच्चित-पदम् | न |
| Universal Dependency | समुच्चितानन्तर-पदम् | प्रथमसमुच्चित-पदम् | न |

# 3 भारतीयव्याकरणशास्त्रानुसारं समुच्चयनिरूपणम्

पाश्चात्यभाषाविदुषां सङ्गणकीयभाषाविदुषां च समुच्चयनिरूपणं समीक्ष्य इदानीं समुच्चयनिरूपणे भारतीयवैयाकरणानां किं वा योगदानं/मतम् इति अधस्तात् अवलोकयामः।

संस्कृतभाषायां conjunctive co-ordination इत्यर्थे समुच्चयद्योतकं **'च'** इति पदं प्रयुज्यते। यच्च एकम् अव्ययं वर्तते। अस्य च चशब्दविषये वैयाकरणानां त्रिषु अंशेषु विशेषचर्चा वर्तते।

1. चशब्दस्य द्योतकत्वम्
2. चशब्दस्य अर्थाः
3. अन्वयः

अस्याश्च चर्चायाः समनन्तरं चशब्दयुक्तवाक्यानां विश्लेषणे तथा तेषां dependency representation इत्यत्र अस्माकं मतं प्रस्तुमः।

## 3.1 चशब्दस्य वाचकत्वम् उत द्योतकत्वम्?

वाक्यपदीयस्य द्वितीये काण्डे निपातानां वर्गीकरणविषये भर्तृहरिः वदति-

**निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।**
**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः।। (२.१९२)**

केचन निपाताः द्योतकाः भवन्ति[1] केचन पृथगर्थाभिधायिनः। पुनः केचन तु आगमा इव पदान्तरं सम्भूय तस्यार्थस्य वाचकाः भवन्तीति सामान्येन त्रिधा वर्गीकरणं करोति। [Iyer] तेषु पुनः चशब्दस्तु केवलं द्योतक एव इति प्रतिपादयति।

**चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः।**
**प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते।। (२.१९४)**

एतेषां केवलानां चादीनां स्वतन्त्ररूपेण प्रयोगाभावात् न वाचकत्वम् अस्ति। यदि च वाचकाः स्युः तदा गवादिवत् केवलानामपि तेषां प्रयोगः स्यात्। परं स्वतन्त्रप्रयोगस्तु न दृश्यते। वाक्ये पूर्वम् अथवा पश्चाद्[2] यत्र कुत्रापि प्रयुक्ताः एते तदर्थमेव द्योतयन्तीति विकल्पसमुच्चयाद्यर्थेषु **च**शब्दस्य द्योतकत्वमेव [Dvivedi (2012)] इति सुनिश्चितं वर्तते।

## 3.2 चशब्दस्य अर्थाः

सन्ति च चशब्दस्य बहवः अर्थाः। चार्थे द्वन्द्वः (२.२.२९) इति सूत्रभाष्ये तत्र भगवता पतञ्जलिना **समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थः** इति चशब्दस्य चत्वारः अर्थाः प्रदत्ताः।

1. समुच्चयः

[1]तेषामुपसर्गवद् द्योतकत्वं क्वचित् यथा- वृक्षश्च प्लक्षश्चेत्यादौ...पुण्यराजः

[2]उपरिष्टात् पुरस्ताद् वा द्योतकत्वं न भिद्यते।
तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा।। (वाक्यपदीयम् २.१९३)

2. अन्वाचयः
3. इतरेतरयोगः
4. समाहारः

### 3.2.1 समुच्चयः

समुचितिः (collection/grouping) समुच्चयः। केषामिति आकाङ्क्षायाम् उच्यते- पदानाम्। सुप्तिङन्तं पदमिति सुबन्तानां तिङन्तानाञ्च समुच्चयः इत्यवगम्यते। एकस्मिन् वाक्ये तावत् सुबन्तानां समुच्चयः क्रियते। समुच्चयः इति शब्दस्यार्थं विवृण्वन् हरदत्तः [Mishra (1981)] आह-

**यदा परस्परनिरपेक्षाः पदार्थाः एकस्मिन्प्रतिसम्बन्धिनि पदार्थे समुच्चीयन्ते तदा समुच्चयः।**

यथा-

**यमः गाम् अश्वं पुरुषं पशुं च नयति।** **(8)**

अत्र वाक्ये गवादयः सर्वेऽपि परस्परं निरपेक्षाः सन्ति। पुनश्च नयति क्रियां प्रति तेषां कर्मत्वम् इति धर्मः समानः अस्ति। अत एव समानधर्मिणां[3] गवादीनां चशब्देन समुच्चयः क्रियते। [Jinendrabuddhi (1981) एवमेव -

| | |
|---|---|
| रामः यानेन नावा पद्भ्यां च गच्छति। | अत्र गमनक्रियां प्रति करणत्वम् आपन्नानां यानादीनां समुच्चयः। |
| रामः श्यामाय भीमाय लक्ष्मणाय च धनं ददाति। | अत्र दानक्रियां प्रति सम्प्रदानत्वम् आपन्नानां श्यामादीनां समुच्चयः। |
| रामः ग्रामात् विद्यालयात् च आगच्छति। | अत्र आगमनक्रियां प्रति अपादानत्वम् आपन्नानां ग्रामादीनां समुच्चयः। |
| रामः देवदत्तस्य भीमस्य लक्ष्मणस्य च कार्यं करोति। | अत्र कार्यम् इति पदस्य सम्बन्धत्वम् आपन्नानां देवदत्तादीनां समुच्चयः। |
| रामः गृहे विद्यालये च पठति। | अत्र पठनक्रियां प्रति अधिकरणत्वमापन्नानां गृहादीनां समुच्चयः। |

अत्र ध्यातव्यः अंशः अयमस्ति यत् समानधर्मिणां पदानां समुच्चयः क्रियते न तु केवलं समानविभक्तियुक्तपदानाम् इति। यतो हि समानधर्मिपदानामपि कदाचित् भिन्नविभक्तिर्भवति। यथा[4]-

**परिणामतापसंस्कारदुःखैः गुणवृत्तिविरोधात् च दुःखम् एव सर्वं विवेकिनः।** **(9)**

अत्र परिणामतापसंस्कारदुःखैः इति तृतीयान्तं पदं गुणवृत्तिविरोधात् इति तु पञ्चम्यन्तं

[3]अत्र क्रियां प्रति गो-अश्वादीनां यत् समानं कर्मत्वम् तदेव तेषां समानधर्मित्वं (न्यासः२.२.२९ )

[4]योगदर्शनम् २.१५

पदं परन्तु क्रियां प्रति हेतुत्वं च अनयोः समानधर्मः अतः एव अनयोः समानधर्मिणोः चशब्देन समुच्चयः।

### 3.2.2 अन्वाचयः

**यदा एकस्य प्राधान्यात्तदनुरोधेन इतरद् अन्वाचीयते तदा अन्वाचयः**[5]। यत्र पुनः एकं वाक्यं प्रधानम् अपरम् वाक्यम् अप्रधानं भवति यथा-

**त्वं भिक्षाम् अट गां च आनय।** **(10)**

तत्र चशब्देन वाक्यद्वयस्य क्रियापदयोः समुच्चयः क्रियते। न तु सुबन्तयोः। अर्थात् वाक्यद्वयं समुच्चीयते इत्यर्थः। अत्र पूर्वस्य क्रियापदस्य प्राधान्यम् अपरस्य तु अप्राधान्यम्[6] भवति। प्राधान्यम् अप्राधान्यम् च वाक्यं दृष्ट्वैव न वक्तुं शक्यते प्रसङ्गानुसारेण निश्चीयते।

### 3.2.3 इतरेतरयोगः

**परस्परापेक्षाणाम् अवयवभेदानुगतः** इतरेतरयोगः इत्युच्यते। अर्थात् परस्परापेक्षयोः पदयोः अत्र समूहः क्रियते। उभयोः पदयोः परस्परापेक्षा अस्तीति सामार्थ्यात् समासः भवति। यथा रामकृष्णौ इति समस्तं पदम्। अत्र रामः अपि कृष्णसहायः कृष्णः अपि रामसहायः इति अनयोः परस्परापेक्षा। एवं परस्परापेक्षितयोः पदयोः पुनः क्रियायां यौगपद्येन योगदानं भवति। यथा

**रामकृष्णाभ्याम् इदं कार्यं कर्तव्यम्।** **(11)**

इति वाक्ये क्रियायाम् उभयेषामपि कर्तृत्वं युगपद् इष्यते। एकस्यापि अभावे सा क्रिया न पूर्णताम् एति। एवमेव

**धवखदिरौ छिन्दि।** **(12)**

इत्यत्रापि छेदनक्रियायां युगपदेव धवखदिरयोः विनियोगः भवति न तु पर्यायेण। इदं समस्तं पदं समूहार्थं बोधयत् अपि स्वावयवार्थम् अपि प्रकटयति इति उद्भूतावयवभेदसमूहरूपेण[7] विज्ञायते। अत एवात्र पदे अवयवानुरुपं द्विवचनबहुवचने संयुज्येते। यत्र पुनः क्रियानिष्पत्तौ उभयेषां युगपद् प्रवृत्तिः न अपेक्षते तत्र परस्परापेक्षाभावः अस्तीति कृत्वा समासः न भवति। अत एवात्र

**रामेण कृष्णेन च इदं कार्यं कर्तव्यम्।** **(13)**

इति वाक्ये चशब्दप्रयोगः भवति। एतेन ज्ञायते यत् यत्र क्रियायां समूहकर्तृत्वकर्मत्वादी-

---

[5]पदमञ्जरी २.२.२९

[6]अन्यस्य प्राधान्यञ्च तत्सम्बन्धिक्रियाया अवश्यकर्तव्यत्वरूपम्। अन्वाचये आनुषगङ्गिकत्वं व्याप्यत्वञ्च समभिव्याहृतक्रियागतश्चार्थः.... (लघुशब्देन्दुशेखरः, चार्थे द्वन्द्वः २.२.२९)

[7]उद्भूतः =प्रकटः अवयवानां भेदो यस्य

नाम् अपेक्षा भवति तत्र समस्तपदप्रयोगः करणीयः इति[8]।

#### 3.2.4 समाहारः

**परस्परापेक्षाणाम् एव तिरोहितावयवभेदः** यत्र पुनः परस्परापेक्षयोः पदयोः समूहः भवति परन्तु अवयवानां भेदः न लक्षते। अत एवात्र सर्वदा एकवचनम् एव प्रयुज्यते। यथा छत्रोपानहम्।

इतरेतरयोगे,समाहारे च सामर्थ्यात्[9] एव समासः भवति। अत्र समासः एव चार्थ-वाचकः इति समूहार्थप्रतिपादनाय पृथक्तया चशब्दः न प्रयुज्यते। समुच्चये, अन्वाचये च समासाभावात् चशब्द प्रयोगेन सः समूहार्थः प्रतिपाद्यते[10]।।

### 3.3 चशब्दप्रयोगः

तावत् चशब्दस्य प्रयोगविधिम् अनुशीलयामः। यत्र सुबन्तानां समुच्चयः तत्र चशब्दप्रयोगे द्विधा पन्थाः अनुसृयते। एकः प्रतिपदं चशब्दप्रयोगः। यथा

**रामः च लक्ष्मणः च सीता च गच्छति।** **(14)**

अत्र यावन्ति सुबन्तानि पदानि समुच्चीयन्ते तावन्ति चशब्दानि प्रयुज्यन्ते। अपरञ्च समुच्चीयमानानां पदानाम् अन्ते एक एव चशब्दस्य प्रयोगः। यथा

**रामः लक्ष्मणः सीता च गच्छति।** **(15)**

अत्र चशब्दपूर्ववर्तिनां सर्वेषां समुच्चयः इति अवगम्यते। यत्र च पुनः एकम् एव समुच्चितं पदं भवति चेत् समुच्चितपदस्य समनन्तरम् एव चशब्दप्रयोगः भवति। यथा

**रामः लक्ष्मणः च गच्छति।** **(16)**

तिङन्तानां समुच्चयविषये तु यत्र समुच्चीयमानस्य द्वितीयक्रियापदस्य कर्तृ-कर्मादिपदं वाक्ये न प्रयुक्तं परं प्रथमक्रियापदस्य कर्तृ-कर्मादिपदम् अध्याह्रियते तत्र द्वितीयक्रियापदस्य समनन्तरम् एव चशब्दप्रयोगः भवति। यथा

**रामः गां पश्यति आनयति च।** **(17)**

यदि च पुनः समुच्चीयमानस्य द्वितीयक्रियापदस्य कर्तृ-कर्मादिपदं वाक्ये प्रयुक्तं भवति तर्हि तस्य समनन्तरमेव चशब्दप्रयोगः भवति। यथा

**रामः शालां गच्छति पाठं च पठति।** **(18)**

---

[8]चैत्रेण मैत्रेण च कृतमिति वाक्ये अवयवकर्तृत्वस्यैव प्रतीतेः, चैत्रमैत्राभ्यां च कृतमिति समासे समुदाय-कर्तृत्वस्यैव प्रतीतेः....... (लघुशब्देन्दुशेखरे टीकायां, चार्थे द्वन्द्वः २.२.२९)। अवयवसम्बोधनं वाक्येन गम्यते समुदायम्बोधनं समासेन ....भाष्ये (न ङिसम्बुद्ध्योः ८.२.८)।

[9]समर्थः पदविधिः २.१.१

[10]ननु समुच्चये चैत्रो मैत्रश्च गच्छतः इत्यादावाख्यातोपात्तसङ्ख्यान्वयाय चार्थसमूहस्य विशेष्यत्वाय चस्य तद्वाचकत्वं वक्तव्यमेव ... (लघुशब्देन्दुशेखरे टीकायां, चार्थे द्वन्द्वः २.२.२९)

## 3.4 क्रियान्वयः

### 3.4.1 समुच्चयानुरूपः क्रियान्वयः

लकारेण अनभिहितानां पदानां यत्र समुच्चयः क्रियते तत्र क्रियान्वयविषये क्लेशः न तावत् भवति। यथा-

**बालकः रामायणं महाभारतं च पठति।** **(19)**

अत्र पठ् धातोः रामायणं कर्म महाभारतम् अपि कर्म। चशब्देन द्वयोः समुच्चयात् समुचित-योः तयोः सहैव क्रियायां कर्मत्वेन अन्वयः। सङ्ख्यान्वयापत्तिस्तु न भवति अनभिहितत्वात्। परन्तु यत्र लकारेण अभिधीयमानानां समुच्चयः क्रियते तत्र तु किञ्चित् अवधेयं भवति। यतो हि अभिहितत्वं नाम लकारस्य तदभिधीयमानपदेन सह पुरुष-वचनानां समानत्वम्। रामः कृष्णः च गच्छतः (20) इत्यत्र रामः इति कर्तृपदम् एकवचनान्तं, कृष्णः इत्यपि कर्तृपदम् एकवचनान्तम्। क्रिया च द्विवचनान्ता इति क्रियायाम् अभिधीयमानपदेन सह सङ्ख्यान्वयापत्तिः भवति। अत एवात्र चशब्देन कर्तृपदानां समुच्चयः ज्ञाप्यते। समुचिते सति समूहात्मिका या द्वित्वादिका सङ्ख्या प्राप्यते तस्याश्च क्रियायाम् अन्वयः भवतीति कृत्वा सङ्ख्यान्वयापत्तिः परिह्रियते। एवं च समुचित-समूहानुरूपं क्रियापदं भवति।

### 3.4.2 अन्त्येन चशब्दसमुचितेन पदेन क्रियान्वयः

यत्र एकाधिककर्तृपदानां समुच्चयः क्रियापदं च पुनः एकवचनान्तम्। यथा

**रामः श्यामः च ग्रामं गच्छति।** **(21)**

तत्र कतरत् वा पदं क्रियया युज्येत इति सन्देहे उच्यते। अत्र अन्त्येनैव चशब्दसमुचि-तेन पदेन क्रियान्वयः स्यादिति सिद्धान्तः। अत्र महाभाष्यस्य प्रामाण्यम् - '**देवदत्तः गाम् अभ्याज शुक्लाम् इह देवदत्त इति उक्ते कर्ता निर्दिष्टः कर्म क्रियागुणौ च अनिर्दिष्टौ।**' [Shastri (1987)] [11] अत्र कर्म क्रियागुणौ इति पदद्वयं चशब्देन समुच्चीयते क्रिया च पश्चाद्वर्तिपदानुगुणैव। वाक्यविश्लेषणक्रमे तु समुच्चीयमानप्रथमपदानुगुणं क्रियायाः अध्या-हारपूर्वकं वाक्यं विश्लिष्यते। यथा कर्म (निर्दिष्टम्) क्रियागुणौ अनिर्दिष्टौ इति।

### 3.4.3 प्रथममध्यमोत्तमपुरुषाणां समुच्चये क्रियान्वयः

यदा कर्ता अस्मद् शब्दः तदा क्रिया तदनुरूपः उत्तमपुरुषः भवति[12]। युष्मद् शब्दे म-ध्यमपुरुषः[13] युष्मदस्मद्भिन्ने तु प्रथमपुरुषः[14] इति सामान्य नियमः। यत्र पुनः वाक्ये

[11] गाम् इति उक्ते कर्म निर्दिष्टम् कर्ता क्रियागुणौ च अनिर्दिष्टौ। अभ्याज इति उक्ते क्रिया निर्दिष्टा कर्तृकर्मणी गुणः च अनिर्दिष्टः। शुक्लाम् इति उक्ते गुणः निर्दिष्टः कर्तृकर्मणी क्रिया च अनिर्दिष्टा। (भाष्यम् १.२.४५)

[12] युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (1.4.105)

[13] अस्मद्युत्तमः (1.4.107)

[14] शेषे प्रथमः (1.4.108 )

प्रथममध्यमोत्तमपुरुषाणां समुच्चयः भवति तत्र सामान्येन पुरुषनियमे अनुक्रमः (hierarchy) उत्तमपुरुषः > मध्यमपुरुषः > प्रथमपुरुषः एवं भवति।
प्रथममध्यमपुरुषयोः समुच्चये मध्यमपुरुषानुरूपं तथा प्रथममध्यमोत्तमपुरुषाणां समुच्चये उत्तमपुरुषानुरूपं क्रिया भवति[15]। तथा चोदाहरणानि-

| | |
|---|---|
| रामः च अहं च गच्छामि। | अत्र उत्तमपुरुषस्य क्रियायाम् अन्वयः |
| त्वं च अहं च गच्छामि। | अत्र उत्तमपुरुषस्य क्रियायाम् अन्वयः |
| रामः च त्वं च गच्छसि। | अत्र मध्यमपुरुषस्य क्रियायाम् अन्वयः |
| रामः च त्वं च अहं च गच्छामि। | अत्र उत्तमपुरुषस्य क्रियायाम् अन्वयः |

यदा पुनः समुचितसमूहस्य क्रियायाम् अन्वयः इष्यते तदापि क्रियायाः पुरुषनियमः यथोक्तरीत्या एव भवति परन्तु क्रियायाः वचनं तु द्वयोः समुच्चये द्वित्वात् द्विवचनं,बहूनां समुच्चये तत्र बहुत्वात् बहुवचनं भवतीति विशेषः।

| | |
|---|---|
| रामः च त्वं च गच्छथः। | अत्र समुच्चितपदद्वयस्य द्वित्वात् द्विवचनम् |
| रामः च भीमः च त्वं च गच्छथ। | अत्र समुच्चितपदानां बहुत्वात् बहुवचनम् |
| रामः च अहं च गच्छावः। | अत्र समुच्चितपदद्वयस्य द्वित्वात् द्विवचनम् |
| रामः च त्वं च अहं च गच्छामः। | अत्र समुच्चितपदानां बहुत्वात् बहुवचनम् |

### 3.4.4 समुच्चये विशेषणपदानां लिङ्गसङ्ख्यान्वयः

यत्र वाक्ये विविधलिङ्गानां पदानां समुच्चयः भवति तत्र च समूहस्य विशेषणत्वेन यत् पदं प्रयुज्यते तस्य किं वा लिङ्गम् स्यात् ? इति जिज्ञासायाम् उच्यते- सामान्येन लिङ्गस्य अनुक्रमः (hierarchy) नपुंसकलिङ्गः > पुँल्लिङ्गः > स्त्रीलिङ्गः एवं क्रमेण भवति।
समुच्चितपदसमूहे यदि नपुंसकलिङ्गं पदं भवति तर्हि तत्समूहस्य विशेषणम् पदम् अपि नपुंसकलिङ्गम् एव भवति। यदि च पुनः समुच्चितपदसमूहे पुँल्लिङ्गस्त्रीलिङ्गपदान्येव भवन्ति तर्हि तत्र विशेषणं पदं पुँल्लिङ्गम् एव भवति। यथा च उदाहरणम्-

**राजा राज्ञी च स्तुत्यचरितौ स्तः। (22)**

[Kale 789] अत्र राजा इति पुँल्लिङ्गम् पदं, राज्ञी इति स्त्रीलिङ्गपदम्। चशब्देन पुनः अनयोः समुच्चयः। समुच्चयसमूहस्य विशेषणं स्तुत्यचरितौ इति पदं पुँल्लिङ्गे वर्तते। अन्यदेकम् उदाहरणम्-

**धर्मः कामः च दर्पः च हर्षः क्रोधः सुखं वयः।**
**अर्थाद् एतानि सर्वाणि प्रवर्तन्ते न संशयः।। (23)**

[15]त्यदादीनि सर्वैर्नित्यम्, त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते ...... (भाष्ये उद्योतः १.२.७२)

अत्र वयं द्रष्टुं शक्नुमः यत् सर्वाणि इति विशेषणं पदं नपुंसकलिङ्गे प्रवर्तते। [Kale 789]

एतदाधारेण सङ्क्षेपेण सार एवं सङ्गृहीतः भवति।

- समुच्चये प्रयुज्यमानः चशब्दः वाचकः न अपि तु द्योतकः।
- समुच्चितपदयोः परस्परापेक्षा न भवति यथा क्रियां प्रति भवति।
- कदाचित् समुच्चितपदयोः क्रियया सह सम्बन्धः असामानवर्ती (asymmetry) भवति। समुच्चितपदयोः अन्तिमपदस्यैव क्रियया सह लिङ्गसङ्ख्यान्वयः भवति। पूर्वपदस्य तु न भवति।
- यत्र पुनः चशब्देन समुच्चयः क्रियते, स च समुच्चयः समूहरूपेण विज्ञायते। तत्र समूहस्यैव क्रियया सह लिङ्गसङ्ख्यान्वयः भवति।

# 4 Governance

यतो हि चशब्दः द्योतकः अस्ति अत एव वाचकपदस्य इव वाक्ये पदान्तरेण अस्य आश्रयाश्रयीभावसम्बन्धः न भवति। न वा चशब्दः कुत्रापि आश्रयं याति न च अन्यानि पदानि अस्मिन् चशब्दे आश्रयं यान्ति। एतदाधारेण इदानीम् अस्माभिः चशब्दयुक्तवाक्यानां (dependency structure) विश्लेषणम् अधस्तात् एवं प्रकारेण प्रस्तूयते।

## 4.1 सुप्समुच्चयः

सुबन्तानां समुच्चयः तावत् द्विधा विश्लिष्यते। क्रियान्वयः अन्त्येन चशब्दसमुच्चितेन पदेन सह भवति। अथवा क्रियान्वयः चशब्दसमुच्चितपदसमूहानुरूपेण भवति इति। तत्र अन्त्येन चशब्दसमुच्चितेन पदेन अन्वयस्य उदाहरणं वाक्यम्

**रामः भरतशत्रुघ्नौ च ग्रामं गच्छतः।** **(24)**

इति वाक्यस्य dependency-विश्लेषणं पश्यत चित्रेऽस्मिन् [10]-




चित्रम् 10: रामः भरतशत्रुघ्नौ च ग्रामं गच्छतः।

अत्र चशब्दस्य भरतशत्रुघ्नौ इति पदस्य मध्ये `समुच्चयद्योतकः' (conjoining marker) इति सम्बन्धः, तथैव रामः पुनः भरतशत्रुघ्नौ इति पदयोः मध्ये `समुच्चित' (conjoined) इति सम्बन्धः अङ्क्यते। क्रिया चात्र कर्तरि प्रयोगे वर्तते। अतः तस्याः भरतशत्रुघ्नौ इति पदेन अभिहितत्वम् अस्तीति कृत्वा तत्र `कर्ता' इति सम्बन्धेन अङ्कनं क्रियते। तथैव अन्यद् वाक्यम्-

**रामः च त्वं च ग्रामं गच्छसि।** **(25)**




चित्रम् 11: रामः च त्वं च ग्रामं गच्छसि।

अत्र चित्रे [11] क्रियया समीपस्थं `त्वम्' इति समुच्चितपदम् अभिधीयते। वाक्ये चास्मिन् द्वौ चशब्दौ प्रयुक्तौ। तयोः द्वयोरपि समुच्चितपदाभ्यां `समुच्चयद्योतकः' इति सम्बन्धेन अङ्कनं भवति। यत्र पुनः क्रियया समुच्चितसमूहः अभिधीयते तत्र कर्तृत्वम् इति धर्मः समूहे भवति न तु प्रत्येके पदे। अतः तथाविधप्रयोगे सम्बन्धविश्लेषणम् एवं विधीयते। पश्यत चित्रं [12]

**रामः च त्वं च ग्रामं गच्छथः।** **(26)**




चित्रम् 12: रामः च त्वं च ग्रामं गच्छथः।

अत्र समुच्चयद्योतकः, समुच्चित इति सम्बन्धयोः अङ्कनं तु यथा पूर्वमेव भवति। तथा च अन्यदेकम् उदाहरणम्-

**रामः श्यामः भीमः च ग्रामं गच्छन्ति।** **(27)**

इति वाक्यस्य dependency-सम्बन्धाः चात्र चित्रे [13] एवं द्रष्टुं शक्यन्ते।




चित्रम् 13: रामः श्यामः भीमः च ग्रामं गच्छन्ति।

यत्र च वाक्ये पुनः द्वितीयादिविभक्त्यन्तानां पदानां समुच्चयः क्रियते तत्र क्रियान्वयविषये क्लेशस्तु नैव तावत् भवति। यतो हि समुच्चितानां पदानां क्रियानभिहितत्वात् सङ्ख्यान्वयापत्तिरेव न भवति। तत्र समुच्चितपदसमूहं कर्मादिकारकसम्बन्धेन क्रियाम् अन्वयं याति। समुच्चितपदानि तु समुच्चित इति सम्बन्धेन सम्बध्नन्ति। यथा उदाहरणम् -

**रामः दुग्धं जलं च पिबति।** **(28)**

पश्यत चित्रं [14]-




चित्रम् 14: रामः दुग्धं जलं च पिबति।

## 4.2 विशेषणपदानां लिङ्गसङ्ख्यान्वयः

राजा राज्ञी च स्तुत्यचरितौ स्तः। अत्र वाक्ये स्तुत्यचरितौ इति पदं समुच्चयस्य विधेयविशेषणम् (कर्तृसमानाधिकरणम्) अस्ति। अतः अस्य वाक्यस्य चित्रात्मकप्रस्तुतिः एवं प्रस्तूयते। पश्यत चित्रं [15]-




चित्रम् 15: राजा राज्ञी च स्तुत्यचरितौ स्तः।

## 4.3 तिङ्समुच्चयः

यत्र च वाक्ये एकाधिकतिङन्तानां प्रयोगः भवति। तत्र प्रयुक्ततिङन्तपदेन अवान्तरवाक्यानि लक्ष्यन्ते[16]। प्रत्येकस्य तिङन्तस्य अन्वययोग्यानि पदानि यथायथं तिङन्तपदे अन्वयं यान्ति। चशब्देन क्रियापदे समुच्चीयेते। चशब्दस्य च अन्वाचयः इत्यर्थः अतोऽत्र

[16]वाक्यानां समुदायश्च य एकार्थप्रसिद्धये।
साकाङ्क्षावयवस्तत्र वाक्यार्थोऽपि न भिद्यते।। (वाक्यपदीयम् २.७६)

वयं जानीमः यत् उभयोः क्रिययोः स्तरः समानः न भवति। प्रथमा क्रिया प्रधाना भवति। द्वितीया तु गौणी इति। यथा-

**भिक्षाम् अट गां च आनय।** **(29)**

अत्र भिक्षाम् अट इति प्रधानं वाक्यम्। गाम् आनय इति अप्रधानं वाक्यम्। चशब्दस्तु अनयोः वाक्ययोः चमुच्चायकः[17]। एतादृशानां वाक्यसमुच्चयानां dependency-विश्लेषणम् अधस्तात् चित्रे [16] एवं द्रष्टुं शक्यते।




चित्रम् 16: भिक्षाम् अट गां च आनय।

अवधेयम् अत्र यत् प्रधानक्रिया गुणक्रियाम् अनुशास्ति। अर्थात् प्रधानक्रियायां गुणक्रिया आश्रिता अस्तीति यावत्।

यदा पुनः चशब्दप्रयुक्तवाक्ये द्वितीयक्रियापदस्य प्रयोगः न भवति, तादृशानां वाक्यानां विश्लेषणे द्वैविध्यं भवति। यथा -

**रामः गृहं गच्छति सीता च।** **(30)**

इति वाक्ये पूर्वं रामः इति पदस्य क्रियापदे कर्तृत्वेन अन्वयः भवति। ततः सीता च इत्युक्ते किम् इति आकाङ्क्षा उदेति। तदा गच्छति इति क्रियापदस्य अध्याहारं कृत्वा सीता गच्छति इति अवगम्यते[18]। अस्य वाक्यस्य पुनः

**रामः सीता च गृहं गच्छति।** **(31)**

इति वाक्येन तुलना क्रियते चेत् वाक्यस्तरे (Syntax level) पदानां क्रमे भिन्नता वर्तते। परन्तु आर्थिकस्तरे (Semantics level) तु समानता प्रतीयते। यतो हि संस्कृते पदक्रमः (Word order) नियतः नास्ति। अतः उपरिष्टात् वाक्ययोः समानमेव विश्लेषणं कर्तुं वयं शक्नुमः। अत्र ध्यातव्यः अंशः अयमस्ति यत् अध्याहृतस्य क्रियापदस्य कर्तृ-कर्मादिपदानि अपि पूर्वक्रियायाः एव अनुवृत्तानि (shared)। यत्र पुनः

[17]अत्र चशब्देन क्रियागतं समुचितत्वं द्योत्यते (लघुशब्देन्दुशेखरः (चार्थे द्वन्द्वः २.२.२९))

[18]तत्र चैकस्य क्रियान्वयोत्तरम् अपरस्य क्रियावाचकपदावृत्या तदन्वयात् (लघुशब्देन्दुशेखरः २.२.२९)

**रामः गृहं गच्छति सीता च शालाम् ।** **(32)**

इति वाक्ये गच्छतीति क्रिया तु अध्याह्रियते। परन्तु तस्य कर्तृ-कर्मादिपदानि पूर्वक्रियायाः न अनुवृत्तानि (shared), अपितु अत्रैव वाक्ये साक्षात् उच्चारितानि। वस्तुतः अत्र रामः गृहं गच्छति इति एकं वाक्यम्। सीता शालां गच्छति इति अपरं वाक्यम्। इह रामः इति पदस्य सीता इति पदेन समुच्चयः कर्तुं न शक्यते। यतो हि उभे च पदे भिन्नवाक्यस्थे स्तः। अत्र रामकर्तृकः गृहकर्मकः गमनानुकूलव्यापारः भिन्नः। सीताकर्तृकः शालाकर्मकः गमनानुकूलव्यापारश्च भिन्नः। अनयोश्च व्यापारयोः समुच्चयः इति वाक्यार्थः। अत एव अस्माभिः एतादृशानां वाक्यानां dependency representation एवं प्रस्तूयते। अध्याहृतक्रिया चात्र बिन्दुरेखया अङ्क्यते। पश्यत चित्रं [17]-




चित्रम् 17: रामः गृहं गच्छति सीता च शालाम्।

## 5 निष्कर्षः

अस्माभिः परिलक्षितं यत् चशब्दयुक्तवाक्यविश्लेषणे पाश्चात्यभाषाविदुषां मतैक्यं नास्तीति। अत एव विविधभाषाणां कृते निर्मितेषु tree banks-मध्ये भिन्नता दृश्यते। सा च भिन्नता निम्नदर्शितप्रकारेण वर्तते।

1. समुच्चितपदेषु समुच्चयद्योतकपदेषु च मध्ये यः सम्बन्धः सः समानुवर्ती (symmetric) भवति अथवा नापि भवति।
2. समुच्चयद्योतकपदं समुच्चितपदानि अनुशास्ति अथवा न। अर्थात् समुच्चितपदानाम् आश्रयः भवति कदाचित् नापि भवति इति यावत्।
3. समुच्चयद्योतकपदं स्वयमपि अन्याश्रितो भवति नापि भवति।

भारतीयव्याकरणशास्त्रस्य पुनः भाषायाः शिष्टप्रयोगाणां सर्वेक्षणेन अधो दर्शितांशाश्च अधिगम्यन्ते।

1. **समुच्चये समुच्चितपदानां परस्परापेक्षा न भवत्येव।**

2. **क्रियान्वयः अन्त्येन चशब्दसमुच्चितेन पदेन भवति। अथवा चशब्देन समुच्चितसमूहेन भवति।**

3. **समुच्चयद्योतकः चशब्दस्तु न कुत्रचिदन्वयं याति। न वा अन्येषाम् आश्रयः भवति।**

एतेषां चांशानामाधारेण इदानीं वयं प्रधानपदस्य (governer) dependency-सम्बन्धानां प्रस्तुतिं कर्तुं शक्नुमः। यत्र क्रियापदेन समुच्चितसमूहः अभिधीयेत तत्र समूहे एव कर्तृत्वादिशक्तिः भवति। समुच्चयद्योतकपदं समीपस्थसमुच्चतपदेन संयुनक्ति। समुच्चितपदानि तु चशब्दसन्नियोगेन परस्परं संयुञ्जन्ति। यत्र पुनः क्रियया समीपस्थं समुच्चितपदम् अभिधीयेत तत्र तु अन्तिमसमुच्चितपदमेव क्रियया युज्यते। अन्यसमुच्चितपदानि चशब्दसन्नियोगेन अन्त्यसमुच्चितपदे संयोगं प्राप्नुवन्ति इति।

# Bibliography


Dvivedi, K. (2012). Arthavijñāna aura vyākaraṇa darśana. Hindustani Academi Allahabad.

Hudson, R. A. (1988). Coordination and grammatical relations. Journal of Linguistics, 24(2):303--342.

Iyer, K. A. S. Vākyapadīya of Bhartṛhari Containing the Tika of Punyaraja and the Ancient vritti. Motilal Banarasidass, Varanasi.

Jahannessen, J. B. (1998). Coordinatopn. Oxford Studies in Comparative Syntax. Ocford University Press.

Jinendrabuddhi (1981). Nyasa. Sanskrit Parishat, Osmania Unniversity, Hyderabad.

Mazziotta, N. (2014). Coordination of verbal dependents in old french. In Kim Gerdes, Eva Hajiv́ cová, L. W., editor, Dependency Linguistics: Recent advances in linguistic theory using dependency structures. John Benjamins Publishing Company.

Mel'čuk, I. (1988). Dependency Syntax: Theory and Practice. The SUNY Press, Albany, New York.

Mishra, H. (1981). Padamanjari. Sanskrit Parishat, Osmania Unniversity, Hyderabad.

Nivre, J. (2005). Dependency grammar and dependency parsing. Technical report, Växjö University.

Osbone, T. and Kahane, S. (2015). Lucin Tensnière :Elements of Stuctural syntax. John Bengamins.

Osborne, T. (2008). Major constituents : And two dependency constraints on sharing in coordination. Linguistics, 46(6) :1109--1165.

Popel, M., Maraeček, D., Štěpánek, J., Zeman, D., and Žabokrtský, Z. (2013). Coordination structures in dependency treebanks. In Proceedinsg of 51st ACL.

Rosta, A. (2006). Structural and distributional heads. In Sugayama, K. and Hudson, R. A., editors, Word Grammar : New Prespectives on a Theory of Language Structure, pages 171--203. Continuum, London.

Shastri, B. (1987). pāṇīnīyavyākaraṇamahābhaṣyam. Chowkhamba Sanskrit Pratishthan, New Delhi.

Shukla, P., Shukl, D., and Kulkarni, A. (2010). Vibhakti divergence between sanskrit and hindi. In Jha, G. N., editor, Proceedings of the International Sanskrit Computational Linguistics Symposium. Springer-Verlag LNAI 6465.